संप्राप्तः कुरुजाङ्गलान्" भाग० १,४,७, कुरवो जाङ्गलाश्च देशभेदाः"श्रीधरः" । कुरवश्च जाङ्गलञ्च "विशिष्टलिङ्गो नदीदेशोऽग्रामतः" पा०समा० एकवद्भावे कुरुजाङ्गलम् । २तत्समाहारे न० [ वरकशाके राजनि० ।

**कुरुट** पु० कुत्सितं रोटति रुट—दीप्तिप्रतिघाते क । सिता-

**कुरुराट** पु० कुत्सितं रुराटनि रुटि—स्तेये अच् । पीतझिण्ट्याम् पीताम्लाने मेदि० । स्वार्थे क । तत्रार्थे अमरः

**कुरुण्टी** स्त्री कु+रुटि—स्तेये अच् गौरा० ङीष् । १दारुपुत्तलिकायां मेदि० । २ब्राह्मण्यां जटा०

**कुरुत** पु० कुर—बा०उतक् । वंशनिर्मिते वृहदाकारे पात्रभेदे सद्व पादोऽस्य हस्त्या० नान्त्यलोपः । कुरुतपादइत्येव ।

**कुरुतीर्थ** न० भारतप्रसिद्धे तीर्थभेदे तच्च तीर्थं "यत्र ब्रह्मादिभिर्देवैर्ऋषिभिश्च तपोधनैः । सैनापत्येन देवानामभिषिक्तो गुहस्तदा । तैजसस्य च पूर्वेण कुरुतीर्थं कुरूद्वह! कुरुतीर्थे नरः स्नात्वा ब्रह्मचारी जितेन्द्रियः । सर्वपापविशुद्धात्मा ब्रह्मलोकं प्रपद्यते" भा० व०८३अ० उक्तम् । [ क्रायामल्लायां नद्याम् ।

**कुरुनन्दिका** स्त्री यया लिका नदी कुरुनन्दिकेत्युच्यते इत्यु-

**कुरुपिशङ्गिला** स्त्री कुरु इत्यनुकरणशब्दकरणेन मूलावयवभक्षिकायां गोधायाम् "कईमरे पिशङ्गिला कई कुरुपिशङ्गिला" इति प्रश्ने "अजारे पिशङ्गिला श्वावित् कुरुपिशङ्गिला" यजु० २३।५५।५६। उत्तरम् "श्वावित् गोधा कुरुपिशङ्गिला । कुरुशब्दोऽनुकरणे पिश—अवयवे इति धातोरिगुपधेति कप्रत्ययः कुरु इति शब्दानुकुर्वाणा पिशान् मूलाद्यवयवान् गिलति । पिशङ्गिला मूलानि यतं कुर्चौ स्थापयति यतञ्च भक्षयतीति गोधायाः स्वभावः" वेददीपः ।

**कुरुब** न० कुर—बा० उबच् । (कमलालेबु) १कुलपालके जम्बीरभेदे शब्दच० । २द्रोणपुष्प्यां स्त्री० टाप् राजनि० गौरा० ङीष् । सैंहलीवृक्षे राजनि० । स्वार्थे क तत्रार्थे

**कुरुराज्** पु० कुरुषु राजते राज—क्विप् । दुर्य्योधने त्रिका० कुरूणां राजा टच्समा० । कुरुराजोऽप्यत्र

**कुरुल** पु०कुर+उलक् । ललाटस्थे चूर्णकुन्तले हेमच०

**कुरुवक** पु० कु+रु—क—कुत्सितं रुवोभ्रमरो यत्र कप् । १रक्तझिण्ट्याम् अमरः २पीतझिण्ट्यां हेम०

**कुरुवर्ष** न० कुरुसंज्ञकं वर्षम् । जम्बुद्वीपस्थे उत्तरकुरुसंज्ञके वर्षभेदे उत्तकुरुशब्दे १०९४पृ० विवृतिः

**कुरुविन्द** पु० कुरून् मूलकारणत्वेन विन्दति विद—श सुचा०सम् । १मुस्तायाम् अमरः २माषे राजनि० ३ काचलवणे ४माणिक्यरत्ने न० राजनि० । ५कुरुविल्वरत्ने ६कुल्माषे व्रीहिभेदे मेदि० ७दर्पणे ८हिङ्गुले च न० शब्दचि०

**कुरुविल्व** पु०कुरुषु विल्वइव । १पद्मरागमणौ त्रिका० संज्ञायां क । कुरुविल्वक कुलमाषे (वनकुरथि) रत्नमा०

**कुरुविस्त** पु० कुरुषु विख्यातः विस्तः । स्वर्णपले अमरः

**कुरुवृद्ध** पु० कुरूणां जनपदानां राजानः तद्राजस्य तद्धितस्य बहुषु लुक् तेषु कुरुषु वृद्धः । भीष्मे । "तस्य संजनयन् हर्षं कुरुवृद्धः पितामहः" गीता ।

**कुरुश्रवण** त्रि० कुरवः यज्ञकर्त्तारः तेषां श्रवणः स्तोतृणां श्रोता श्रु—नन्द्या ल्यु । ऋत्विजां स्तुतिश्रोतरि "कुरुश्रवण मावृणि राजानं त्रासदस्यवम् ऋ०१०,३३अ० "कुरुश्रवण ! ददतो मघानि" ऋ० १०।३३।९ । हे कुरुश्रवण ! कुरवः ऋत्विजः तेषां स्तुतीनां श्रोतः !" भा०

**कुरूटिनी** स्त्री किरीटिनी+वेदे पृषो० । किरीटयुक्तायां सेनायाम् "बाहिनी विश्वरूपा कुरूटिनी अथ० १०,१,१५

**कुरूप्य** न० ईषत् रूप्यं शुभ्रत्वेन सादृश्यात् । १रङ्गनामके धातौ राजनि० कोः पृथिव्याः कुस्थानात् वा आगत रूप्यप् । पृथिव्याः कुस्थानाद्वा २आगते त्रि०

**कुर्कुट** पुंस्त्री०कुरित्यव्यक्तं शब्दं कुटति कुट—क । कुक्कुटे हारा० "श्वानः कुर्कुटचण्डालाः समस्पर्शाः प्रकीर्त्तिताः । रासभोष्ट्रौ विशेषेण तस्मात्तान्नैव संस्पृशेत्" पद्मपु० स्त्रियां जातित्वात् ङीष् [ भे खगे स्त्रियां ङीप्

**कुर्कुटाहि** पु० कुर्कुटतुल्यमहति अह—इन् । कुर्कुटा

**कुर्कुर** पुंस्त्री० कुरित्यव्यक्तं शब्दं कोरति कुर—क । कुक्कुरे श्वकुक्कुटः "कर्कुराविव कूजन्तौ" अथ०७,९५,२, "उपकर्कुसपि प्राप्तं निःस्व मन्यन्ति कुर्कुरम्" पद्मपु० ।

**कुर्चिका** स्त्री कूर्चिका पृषो० । कूर्चिकाशब्दार्थे अमरटीका

**कुर्ज्जुज** पु० कुलञ्जनवृक्षे गन्धमूले राजनि० ।

**कु(कू)र्द** क्रीडायां भ्वा० आत्म० अक० सेट् । कु(कू)र्द्दते अकु(कू)र्दिष्ट चुकु(कू)र्दे । अर्थवत्परिभाषया नकुरकुरामिति निषेधाप्रवृत्तावपि दीर्घमध्यान्तरपाठसामर्थ्यात् रेफे परे न दीर्घः इति सूचितम् । तेन कुर्दनमित्यादौ न दीर्घः । [ अमरः ।

**कु(कू)र्दन** न० कु(कू)र्द—भावे ल्युट् । क्रीडायां (कोंदा)

**कु(कू)र्पर** पु०कुर—क्विप् कुः पिपर्त्ति अच् परः कर्म्म० । १जानुनि, २कफोणौ च । मेदि० दीर्घमध्यपाठान्तरे त्रि०दीर्घः

**कु(कू)र्पास** पुंन० कूर्परे अस्यते आस्ते वा वस पृ०। स्त्रीणां